Volume-5, Issue-02, February 2018 ISSN: 2349-7637 (Online)

RESEARCH HUB – International Multidisciplinary Research Journal (RHIMRJ)

Research Paper

# दार्शनिकपृष्ठभूमिः अलिविलाससंलापस्य

**ऋषिकेश मीना**

**व्याख्याता**
**राजकीय शास्त्री संस्कृत महाविद्यालय**
**चौथ का बरवाड़ा, (सवाई माधोपुर)**

---

संस्कृतसाहित्ये काव्यशास्त्रस्य प्रणयनपरम्परा प्राचीनकालादेव वर्तते। तथा च परम्परायां नैकविधानि काव्यशास्त्राणि प्राप्तानि वर्तन्ते, तेषु अन्यतमं मिश्रितकाव्यमिति, मिश्रितकाव्येषु कवयः काव्यशोभायै शास्त्रीयतत्त्वानां सन्निवेशं कुर्वन्ति, एतादृश–काव्यानां प्रयोजनं तु काव्यमाध्यमेन शास्त्रीय– तत्त्वानां विश्लेषणमेव भवति, कवयः मिश्रितकाव्येषु शास्त्रीयतत्त्वसंनिवेशात् चमत्कृतिं जनयन्ति, यथा शङ्कराचार्यहर्षप्रभृतादयः। काव्यपरम्परया सहैव शास्त्रपरम्परापि चलति, तथा च शास्त्रकाव्यपरम्परायां 'भट्टिकाव्य' सदृशाः पाण्डित्यपूर्णाः ग्रन्थाः प्राप्यन्ते, एवं च 'अलिविलासिसंलापः' इति महाकाव्यं शास्त्रकाव्यपरम्पराया एव प्रकाशपुञ्जोऽस्ति। अस्य प्रणेतारः म.म. गङ्गाधरशास्त्रिणः सन्ति, इमे आचार्याः काश्याः पाण्डित्यपरम्परायां अग्रगण्याः सन्ति स्म, नवशतकेषु निबद्धस्य सहस्रपद्यात्मकस्यास्य काव्यशास्त्रस्य अध्ययनेन गङ्गाधरशास्त्रिणः ज्ञानस्य पाण्डित्यं गाम्भीर्यञ्च अनायासेन प्रभवति। अस्मिन् महाकाव्ये शास्त्रज्ञानस्य काव्यप्रतिभायाः चानुपमः संयोगः अन्यत्र कुत्रचिदपि न दृश्यते, तेषां कृतिरियम् संस्कृतसाहित्यस्य अमूल्यनिधिः अस्ति। या संस्कृतस्य जीवन्ततायाः एवं सातत्यस्य उज्जवलं निदर्शनं वर्तते। उपनिषदः सम्भृतोऽयं 'अलिविलासिसंलापः' शास्त्राणां 'हैयङ्गवीनमस्ति, प्रस्तुतकाव्यप्रशंसायै प्रथितयशसः पं. नारायणशास्त्रीखिस्तेमहोदयाः उक्तवन्तरू– यत्

''आजन्मोपनिषद्विचारमहिमस्फूर्तिश्च याऽलौकिकी
तस्याः स्वात्मनि या च संस्कृतिरभूतद्वैराग्यसम्पादिका।
साहित्यार्णवमन्थनोत्थित सुधापूरावगाहश्च य
स्तत्सर्व न परोक्षमस्ति विदुषां ग्रन्थेऽत्र सम्पश्यताम्''।।[1]

कविः गङ्गाधरशास्त्री स्वयमेव ग्रन्थस्य प्रतिपाद्यविषयं निदर्शयन् आह–

''येऽलङ्कारगभीररचित्रमधुरोपन्यासशुश्रूषवो
ज्ञातुं भारतविश्रुतामरपुरीतीर्थानि वाञ्छन्ति ये।
ये च द्वादशदर्शनीस्थविषयव्युत्पत्तिजातादशः
संलापोऽलिविलासिनोर्मुहुरयं तैरास्थयाऽऽलोच्यताम्''।।[2]

कविः ग्रन्थस्य समाप्तिकालं सूचयन् ग्रन्थान्ते एक पद्यं ददौ। तदनुसारं ग्रन्थस्यास्य समाप्तिः काश्यां 1964 वि. (सन् 1907) बभूव। ग्रन्थस्यास्य आदिमशतकानां प्रकाशनं 'सूक्तिसुधा' पत्रिकायां अभवत्, तदनन्तरं अस्य ग्रन्थस्य कस्याञ्चित् भाषायां अनुवादोऽपि न जातः, साम्प्रतम् आचार्यरमाकान्तपाण्डेयमहोदयः गङ्गानाम्नीटीकां कृतवान्।

संस्कृतसाहित्ये महाकाव्यरचनायाः लम्बायमाना परम्परा दृश्यते तद्यथा– रामायणम्, महाभारतम्, रघुवंशम्, कुमारसंभवमित्यादीनि महाकाव्यानि, एतानि सर्वाण्यपि महाकाव्यानि संस्कृतसाहित्यस्य गौरवशिखराणि सन्ति, काव्यशास्त्रे भामहादिं समारभ्य सर्वे आचार्याः महाकाव्यस्य लक्षणं चक्रुः। तेषु सर्वेषु लक्षणेषु सर्वेषाम् आचार्याणां लक्षणं प्रदर्शयन् साहित्यदर्पणकारस्य आचार्यविश्वनाथस्य लक्षणं वर्तते, विश्वनाथमतानुसारं सर्गबन्धरचनैव महाकाव्यमिति, तथाविधमहाकाव्येषु धीरोदात्तः गुणोपेतः कश्चन देवः क्षत्रियो वा नायकः[3] भवति। एकस्मिन्नेव कुले प्रभवाः अनेके राजानः अपि महाकाव्येषु नायकाः भवन्ति, तथा च श्रृंङ्गारवीरशान्तरसेषु अन्यतमः अङ्गी भवतीति,[4] तथा चान्ये रसा अङ्गरूपेण वर्तन्ते, महाकाव्यस्य वर्ण्यः विषयः प्रायशः प्रथितः भवति, तथा च महाकाव्ये अष्टौ सर्गाः नितान्तम् अपेक्षिताः भवन्ति, तदधिकाः चेत् वरम्। एवञ्च सर्गस्यान्ते कथाऽपि संकेतिता भवति। तथा च प्रकृतेः वर्णनमित्यादिकमपि महाकाव्योपयोगितत्त्वमपि अपेक्षितं भवतीति।

*2016, RHIMRJ, All Rights Reserved*

विश्वनाथस्य काव्यलक्षणम् आदर्शमहाकाव्यमाधारीकृत्य वर्तते, वस्तुतस्तु महाकाव्यानां नियामकता सर्गेषु पद्येषु[5] वा, नाश्रयणीया अथवा नायकस्य कौलीन्यमकौलीन्यं वा[6] इत्यपि न विचारणीयः, अपितु तस्य नियामकता महाकाव्यत्वमाधारीकृत्यैव करणीयम् यस्य कस्यचिद् महाकाव्यस्य रसमयता, महावाक्यता, तथा च जीवनोपयोगिता एव तस्मै महाकाव्यत्वमिति प्रददाति, अभिनवकाव्यालङ्कारस्य सूत्रकारः आचार्यः राधावल्लभत्रिपाठी 'समग्रस्य जीवनस्य यद् निरुपणपरं महाकाव्यम्–' (अ.का.सू. ३/१/३)[7] तदनुसारं महाकाव्यमेव कवित्वस्य पराकाष्ठां प्राप्नोति, ते महाकाव्यकोटौ रामायणमहाभारतादीनां तथा चान्यैः पाश्चात्यकविभिः रचितानां कृतिनामेव परिगणितवन्तः, साम्प्रतम् 'अलिविलासिसंलापः' सर्गव्यस्थया विषयवस्तुदृष्ट्या विश्वनाथप्रभृतीनाम् आचार्याणां मतानुसारं महाकाव्यमेवेति कथयितुं पार्यते, किन्तु तदनुसारं नायकदृष्ट्या इदं महाकाव्यमेवेति कथयितुं पार्यते, किन्तु तदनुसारं नायकदृष्ट्या इदं महाकाव्यमिति कथने कथंचित् क्लेशः समागच्छति, अस्य महाकाव्यस्य नायकः भ्रमरोऽस्ति, किन्तु सैव भ्रमरः परमहंसः, जीवः, गुरुः, ब्रह्म वापि अस्ति, संभवतः कविः अमुं नायक दृष्ट्वा झटिति खण्डकाव्यमिदं प्रोक्तवान्, वस्तुतस्तु नायकस्य कोटिं पश्यन् अस्य काव्यस्य महाकाव्यतायां प्रश्नस्य औचित्त्यं नैव प्रतिभाति, आधुनिकाः कवयः जनकनन्दिनीं सावित्री तथा च दलितनायकानपि आधारीकृत्य महाकाव्यस्य रचनामकुर्वन्, ते उपर्युक्तनायकेषु महाकाव्यनायकसदृशयोग्यताम् आकलय्यैव नायकत्वेन उररीकृतवन्तः। उदाहरणार्थम्– सीताचरितम्, जानकीजीवनम्, भीमायनम्!, दलितोदयम् इत्यादीनि महाकाव्यानि वर्तन्ते।

एवञ्च आचार्यरमाकान्तपाण्डेयदृष्ट्या प्रस्तुतकाव्यस्य महाकाव्यम् अव्याहतमेव। अस्य नायकः अलिः चरमपुरुषार्थस्य प्रतीकोऽस्ति, अत्र शान्तरसस्य प्राधान्यं वर्तते, प्रथमशतके तृतीयशतके च प्रकृतेः चारुतमं वर्णनं पञ्चमशतके भारतस्य पुण्यतीर्थानाम् वर्णनम्, तथा अन्ते मोक्षप्राप्तिं दृष्ट्वा अलेः समग्रजीवनस्येदं महाकाव्यमिति वक्तुं पार्यते, तथा चेदं महाकाव्यमिति दृढतरं जातम्।

'अलिविलासिसंलापः' परब्रह्मप्राप्तये औपनिषदिकं महाकाव्यम् वर्तते, उपनिषदाम् गर्भे निहित–अद्वैततत्त्वस्य स्फुटस्वरूपमेव अस्य महाकाव्यस्य प्रतिपाद्यो विषयः वर्तते, संसारासारत्वं निरूप्य सच्चिदानन्दं प्रति जीवं प्रवर्त्तयति, इत्येव कवेः लक्ष्यमस्ति, अतोऽत्र स्वभावतः शान्तरसस्य प्राधान्यं वर्तते, अलेरू उक्तिषु सर्वत्र शान्तरसस्य चारूतमाभिव्यक्तिः दृश्यते। काव्यान्ते विलासिनः हंसभावं प्राप्नोति, तथा च अलिविलासिहंसानां परस्परं भेदस्य समाप्तिर्दृश्यते, अतः अनया परिस्थित्या तेषाम् अद्वैते समागमनम् इति प्रतिभाति, अत्र 'तत्त्वमसि'[8] इति महाकाव्यस्य व्याख्यां कुर्वन् 'तत्' पदार्थः अलिरिति 'त्वम्' पदार्थः विलासी, तथा अभेदोत्पादक– 'असि' पदार्थस्थानीयत्वेन 'हंसः' गृहीतो वर्तते, एतेषाम् ऐक्यमविभागवर्णनञ्च अस्य महाकाव्यस्य प्रतिपाद्यो विषयः वर्तते, एतादृश्स्थलेषु शान्तरसानुभूतेरभावः इति नैव वक्तुं शक्यते, विलासिनः चार्वाकरूपेण पराजयः पुनः बौद्धस्सन् उत्पत्ति तथा च बौद्धरूपेण पराजयः पुनः जैनरूपेण उत्पत्तिः, इत्ययं वृत्तान्तः अद्भुतरसं सृजति। काव्यादौ सरोजिन्याः वर्णनं विप्रलम्भशृंगारस्य पोषकः अस्ति, प्रथमतृतीयशतके प्रकृतेः उद्दीपकता दृष्टव्यास्ति, इत्थमेव अन्येषु शतकप्रसङ्गेषु तद्रसानाम् अभिव्यञ्जना दरीदृश्यते। अलिविलासिसंलापे प्रतिपद्यं अलंकाराणां भृशं प्रयोगाः अभवन् तथापि श्लेषस्य प्रयोगे कवेः विशिष्टयोग्यता वर्तते, प्रथमशतके श्लेषस्य प्रयोगः कस्य सहृदयस्य चेतः न दूनीकरोति? पञ्चमशतके कुवलयानन्दशास्त्रे सर्वेषाम् वर्णितानाम् अलंकाराणाम् उदाहरणानि प्रस्तुतानि सन्ति, यमकानुप्रासयोः स्वाभाविकी सन्निविष्टिः, तथा च उपमारूपकोत्प्रेक्षादीपकादीनाम् अलंकाराणां निदर्शनं प्रतिपदं सम्प्राप्यते, षष्ठशतकस्यादौ यमकालंकारस्य चारुप्रयोगः कं रसिकमनः नाकर्षयति? काश्याः प्रासादमयवर्णने उत्प्रेक्षायाः, पार्वत्याः वर्णने रूपकातिशयोक्तेः तथा कावेरीवर्णने स्वभावोक्तेः सुन्दरचित्रणं कवेः अलंकारेषु प्रयोगपटुतां द्योतयति। कवेः श्लेषस्य प्रयोगपटुतायाः उदाहरणम्–

'अहीनवसनाकृतिर्वहति विग्रहे भूषणा
न्य हर्निशमुपास्यते जगति योदयाकाङ्क्षिभिः।
सदानवविभूतिभासिततनुश्च मीनाक्ष्यसौ
स पाण्ड्यविषये मनो हरति सुन्दरेशश्च मे।।[9]

पद्येऽस्मिन् भगवत्त्याः मीनाक्ष्याः वर्णनमस्ति, किन्तु कवेः श्लेषालंकारस्य प्रयोगपटुत्वेन भगवतः सुन्दरेशस्य स्तुतिः स्वयमेव अगात्। भगवतीमीनाक्षीपक्षे अहीनवसनाकृतिः विशेषणं तस्याः सुन्दरवसनं तथा आकृतिम् इंगयति। एवं च भगवतः शिवस्य पक्षे सर्पाणां दिगम्बराणाञ्च द्योतयति। योदयाकाङ्क्षिभिः (या उदयाकाङ्क्षिभिः तथा यः दयाकाङ्क्षिभिः) विशेषणं क्रमशः भगवत्त्या तथा सुन्दरेशस्य भक्तानां वाचकोऽस्ति इत्थम् 'सदानवविभूतिभासिततनुः' इति विशेषणं मीनाक्ष्याः पक्षे तया नित्यनवविभूतिभ्यः सुसज्जितायाः मीनाक्ष्याः गात्रस्य वाचकः, तथा च भगवतः शिवस्य पक्षे (स दानवविभूतिभासिततनुः) दानवानाम्। विभूत्या भासितस्य भगवतः शिवस्य गात्रवाचकोऽस्ति।

अलिविलासिसंलापे अनेके दार्शनिकपक्षाः नरीनृत्यन्ते, तथा च साहित्यशास्त्रस्यापि बहवः पक्षाः अत्र उद्धृताः वर्तन्ते, अत एव काव्यस्यास्य अध्ययनमध्यापनञ्च उत्कर्षकारकं भविष्यतीति। कविः काव्यस्य प्रत्येक शतके भिन्न–भिन्नछन्दांसि प्रयुक्तवान्। पूर्वार्द्ध संकलितेषु चतुर्पु शतकेषु शार्दूलविक्रीडितस्य, उपजातेरू, पुष्पिताग्रायाः, द्रुतविलम्बितस्य, मालिन्या, स्रग्धरायाः, शिखरिण्याः, वसन्तलिलकायाः, प्रयोगः बहुशः अत्र मिलति, अलिविलासिसंलापे युगबोधस्य बीजान्यपि व्यङ्यानि सन्ति, दार्शनिक भवन् काव्येदं स्वातन्त्र्यपूर्वककवितायाः विशिष्टतया परिपूर्णोऽस्ति, संसारबन्धनात् मोक्षव्याजने सः परतन्त्रतायाः वैदेशिकप्रभावाद् मुक्तेः संदेशं ददति,

*2016, RHIMRJ, All Rights Reserved*

भारतीयसरलजनान् अन्यथा– करणाय अंग्रेजशासकानां नीतयोऽपि अत्र दृश्यन्ते, इदं सर्वविदितं यत् परतन्त्रभारते अंग्रेजजनानां प्रति विरुद्धं नाचरन्ति स्म। अतः तत्कालीनाः कवयः साहित्यकाराश्च अन्यव्याजने देशप्रेमभावनायाः जागृति कृतवन्तश्च। एवं स्थलानि अलिविलासिसंलापे बहुधा दृश्यमानानि वर्तन्ते। तत्र तत्कालप्रभवाः समस्याः वर्णितास्सन्ति, इदमपि व्यङ्ग्यमस्ति।

**सन्दर्भ सूची**


1. अलिविलासिसंलाप : – प्रस्तावना
2. अलिविलासिसंलापः – प्रस्तावना
3. साहित्यदर्पणम् – षष्ठपरिच्छेदः
4. साहित्यदर्पणम् – षष्ठपरिच्छेदः
5. साहित्यदर्पणम् – षष्ठपरिच्छेदः
6. साहित्यदर्पणम् – परिच्छेदः
7. अ.का.सू. ३/१/३
8. बृहदारण्यकोपनिषद्
9. अलिविलासिसंलाप :